**Ramsaday College**

Department of Sanskrit

Study material for Sanskrit General Sem-V

Paper-DSE-1 Section-C Unit-II

Prepared by- Dr. Chaitali Kanjilal

## सत्त्वगुणः

श्रीमद्भगवद्गीतायाः गुणत्रयविभागयोगः इति चतुर्दशोऽध्याये सत्त्वगुणस्य स्वरूपम् व्याख्यातम्। गुण प्रकृतेः परिणामः। स च त्रिविधः- सत्त्वरजस्तमश्चेति। प्रकृतिसम्भवाः गुणाः देहे अव्ययं देहिनं निबध्नन्ति। उच्यते-

*सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।*

*निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।।*

गुणत्रयेषु सत्त्वं नाम प्रथमः गुणः। सत्त्वं निर्मलत्वात् स्फटिकमणिरिव प्रकाशकम् अनामयं निरुपद्रवम्। तत् सुखसङ्गेन ज्ञानसङ्गेन च देहिनं बध्नाति-

*तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम्।*

*सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।।*

सत्त्वं सुखे संश्लेषयति। अस्मिन् आत्मनो भोगायतने देहे सर्वेषु उपलब्धिसाधनेषु श्रोत्रादिकरणेषु द्वारेषु यदा अन्तःकरणस्य बुद्धेः वृत्तिः प्रकाश उपजायते तदा ज्ञानप्रकाशेन लिङ्गेन सत्त्वं विवृद्धम् उद्भूतम् इति विद्यात्-

*सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते।*

*ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत।।*

********